Shri Nrisimhasarasvati Prarthana Ashtakam

શ્રીનૃસિંહસરસ્વતીપ્રાર્થનાષ્ટકમ્

Document Information

Text title : Shri Nrisimhasarasvati Prarthana Ashtakam

File name : nRRisiMhasarasvatIprArthanAShTakam.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI, aShTaka

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

sanskritdocuments.org

શ્રીનૃસિંહસરસ્વતીપ્રાર્થનાષ્ટકમ્

ઋતકૃત્સ્વગિરોઽમરોઽભવદ્ દ્વિજપત્ન્યાસ્તનયોઽપિ યોઽભવઃ ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૧॥

પ્રણવં પ્રપપાઠ જન્મતો વિજહારાલ્પદશોઽપિ સન્મતઃ ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૨॥

મૃતવિપ્રસુતં વ્યજીવયદ્ય ઉ વન્ધ્યામહિષીમદોહયત્ ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૩॥

સ્વતનું યતયે વ્યદર્શયદ્-દ્વિજગર્વં બુરુડાદ્વ્યનાશયત્ ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૪॥

પ્રદદૌ હિ મૃતપ્રિયસ્ત્રિયા અપિ સૌભાગ્યમુ યન્નમસ્ક્રિયા ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૫॥

સ્વમુદેઽભવદન્નવૃદ્ધિકૃત્ સુવશાયાઽપિ વંશવૃદ્ધિકૃત્ ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૬॥

દ્રુરકાર્યપિ શુષ્કકાષ્ઠતઃ કુસુરૌ યેન શુચી ચ કુષ્ઠતઃ ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૭॥

અમરાખ્યપુરે ચ યોગિનીવરદો યોઽખિલદોઽસ્તિ યોગિનીઃ ।
સ નૃસિંહસરસ્વતી યતિર્ભગવાન્ મેઽસ્તિ પરા વરા ગતિઃ ॥ ૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીનૃસિંહસરસ્વતીસ્તોત્રં સમ્પૂર્ણમ્ ।

Please send corrections to *sanskrit@cheerful.com*